५४३

श्रीरामायनमः॥ लुप्तोपमाया अष्टभेदा विविच्य सोदाहरणा लिख्यंते॥ तत्र
भेदाः॥ वाचकलुप्ता। धर्मलुप्ता। धर्मवाचकलुप्ता। वाचकोपमेयलुप्ता। उप
मानलुप्ता। वाचकोपमानलुप्ता। धर्मोपमानलुप्ता। धर्मोपमानवाचकलु
प्ताचेति। तत्र वाचकलुप्तोदाहरणं॥ प्रतापाल्हादयोर्योगाद्रामः सूर्यो वि
धुर्बभौ॥ अत्र प्रतापल्हादयोगरूपसाधारणधर्मोपादानात्सूर्यचंद्रोपमा
नलाभाच्च राम उपमीयते परं तु वाचकेवादिलोपः स्पष्टः॥१॥ अथ धर्मलुप्ता
समुद्र इव काकुत्स्थो रेजे योध्यापुरे विभुः॥ अत्र गांभीरत्वादिति धर्म उन्नेयः॥
धर्मवाचकलुप्ता यथा॥ दाक्षिणाशास्थितो रामः सुमेरुर्लक्षितो नरैः॥ अत्र ब्र
ह्मादाश्रयत्वादिति धर्मानुपादानं। सुमेरुरिवेति वाचकमुन्नेयं। वाचको

Acc. No:- ~~1078~~ M1132
Title:- उपमाभेदा:
subject:- Rhetoric
पेज:- ③

१

पमेयलुप्ता यथा॥ सर्वंसहत्वात्सर्वस्याधारत्वाद्वसुधा बभौ॥ अत्र सर्वंसहत्व
सर्वाधारत्वरूपधर्मोपादानादुपमेयरामपदाभावेपि वसुधापदोत्तर इव
पदयोगेन रामः सेव बभाविति ध्येयं॥ उपमानलुप्ता यथा॥ गुरुमंगलसं
राज्ञि जेवायोध्यापतिर्बभौ॥ अत्र गुरु यन्मंगलं शुभं तेन सम्यक् शोभ
मानः श्रीरामो बभाविति वाक्यपूरणेपि इव पदं बोध्यः उपमानोपमेयभा
वो ज्ञायते॥ तत्र च गुरुमंगलाभ्यां शोभमानो मध्यस्थो बुधइवेत्यु
पमानलोप ऐच्छिकः। गुरुमंगलसंराजत्वमुभयनिष्ठो धर्मः इवेति वाच
कं अयोध्यापतिरित्युपमेयं च स्तेयं॥१॥ वाचकोपमानलुप्ता यथा॥ अमृ

१

तस्याविकरतो रामो रेजे धरातले॥ अत्रामृतस्याविकरत्वरूपधर्मासित
वं इवेति वाचकोपमानपदसंबद्धोर्थः प्रतीयते॥ धर्मोपमानलुप्ता यथा
श्रीराघवो विजयते तुल्यः सर्वत्र पूजितः॥ अत्र नास्ति तुल्यो यस्येति बहुसत्ति
विशिष्टः सर्वदेवपूजाविषयीभूतो राघवः प्रतिपादितः॥ तत्र च श्लेषमहि
म्नातुल्य इति पदच्छेद गम्यो वाचकशब्दो ज्ञायते तथा च केन तुल्य इत्या
कांक्षायां सर्वत्र पूजितस्येवोपमानग्रहणे श्लाघ्यत्वादसाधुदमकत्वा
दिधर्माक्रांतो विष्ण्वादिरुपमानत्वेन विवक्षणीयः एवं च धर्मोपमानलो
पः सिद्धः॥ धर्मोपमानवाचकलुप्ता यथा॥ कौसल्यायां प्रभुः श्रीमानु

(2)

दीयायमनोरमः॥ अभ्योदीयायेतिक्रियापदमहिम्ना कौसल्यायामि
न्निसमग्नीनिर्देशेनच प्राचीसमुदितप्रकाशकत्वादिधर्माक्रांतश्चंद्रः
सूर्येविलक्ष्यन्ते तथाच कौसल्यानुल्यायां प्राच्यांउदितःश्रीमानूचं
द्रइव श्रीरामउपमीयत्ते॥ एवंच केवलरामोपमेयलाभेनपदम
हिम्नेवाष्टमउपमाभेदउहनीयः॥ अयंचभेदःप्रायः समासोक्ति
सदृशोभातियद्यपितथापितत्र केवलध्वनिमर्यादयार्थस्फू
र्तिरत्रपदमहिम्नेत्तिभेदोवसेयः॥ श्रीरामचंद्रोजयति॥

(३)